"यातुर्यातना पीड़ा ।" इति सायणः ॥ कर्म्म-नाशकरी हिंसा । यथा, तत्रैव । ५ । १२ । २ ।

"नाहं यातुं सहसा न द्वयेन ऋतं सपाम्य-
रुषस्य वृष्णः ।"

"यातुं कर्म्मणां नाशकरीं हिंसाम् ।" इति तद्भाष्ये सायणः ॥)

यातु, त्रि, यातीति । या+"कमिमनीति ।" उणा० १ । ७३ । इति तुः ।) गन्ता । इत्युणादिकोषः ॥ क्रियापदं चेत् गच्छतु ॥

यातुघ्नः, पुं, (यातु हन्तीति । हन्+"अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

यातुधानः, पुं, (यातूनि रक्षांसि दधाति पुष्णातीति । धा+बहुलमन्यत्रापीति युच् । स्वजातिपोषकत्वात्तथात्वम् ।) राक्षसः । इत्यमरः । १ । १ । ६३ ॥ (यथा, भट्टिकाव्ये । २ । २९ ।

"दक्षिणयदिष्टां क्षतमार्त्तलीने-
स्तद्यातुधानैश्चिचिते प्रवर्षत् ॥")

यात्रकः, पुं, (यातेवेति । यात्र+स्वार्थे कन् ।) पान्थः । इति शब्दरत्नावली ॥

यात्यं, त्रि, यतितव्यम् । यतनीयम् । यतधातोः कर्म्मणि ण्यत्प्रत्ययेन निष्पन्नम् ॥

यात्रा, स्त्री, (या+"हुयामाश्रुभसिभ्यस्त्रन् ।" उणा० ४ । १६७ । इति त्रन् । टाप् ।) विजिगीषोः प्रयाणम् । तत्पर्य्यायः । व्रज्या १ अभिनिर्य्याणम् ३ प्रस्थानम् ४ गमनम् ५ गमः ६ । इत्यमरः । २ । ८ । ९५ ॥ प्रस्थितिः ७ यानम् ८ प्रयाणम् ९ । इति शब्दरत्नावली ॥ यापनम् ॥ (यथा, भागवते । १० । ८६ । २५ ।

"यात्रामात्रं त्वहरहर्दैवादुपनमत्युत ॥")

उत्सवः । इति मेदिनी । रे, ७८ ॥ (यथा, कथासरित्सागरे । १० । ८७ ।

"यात्रासुपवने द्रष्टुं जगाम सखिभिः सह ॥"

व्यवहारः । यथा, गीतायाम् । ३ । ८ ।

"शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः ॥"

"शरीरयात्रा देहव्यवहारः ।" इति तत्र नीलकण्ठः ॥) उपायः । इति विश्वः ॥ * ॥ अथ यात्रादिनम् । भाद्रपौषचैत्रेतरमासेषु दूरयात्रा कर्त्तव्या । पूर्व्वस्यां दिशि रविशुक्रवारस्य प्राशस्त्यम् । दक्षिणस्यां मङ्गलवारस्य प्राशस्त्यम् । पश्चिमायां सोमशनिवारस्य प्राशस्त्यम् । उत्तरस्यां वृहस्पतिवारस्य प्राशस्त्यम् । पूर्व्वस्यां दिशि सोमशनिवारे न गन्तव्यम् । दक्षिणस्यां वृहस्पतिवारे केषाञ्चिन्मते बुधवारे च न गन्तव्यम् । पश्चिमायां रविशुक्रवारे । एवं उत्तरस्यां बुधमङ्गलवारे न गन्तव्यम् । द्वितीया तृतीया सप्तमी पञ्चमी दशमी एकादशी त्रयोदशी च एता यात्रायां प्रशस्ताः । अथोत्तमनक्षत्राणि । अश्विनी अनुराधा रेवती मृगशिरा मूला पुनर्व्वसु पुष्या हस्ता ज्येष्ठा । मध्यमनक्षत्राणि । रोहिणी पूर्व्वात्रयं चित्रा स्वाती शतभिषा श्रवणा धनिष्ठा । अधमनक्षत्राणि । उत्तरात्रयं विशाखा मघा आर्द्रा भरणी कृत्तिका अश्लेषा । तत्र नक्षत्रमूलकथनम् । स्वात्यां ज्येष्ठायाञ्च पूर्व्वदिग्गमनं निषिद्धम् । एवं पूर्व्वभाद्रपदे अश्विन्याञ्च दक्षिणदिग्गमनं पुष्ये रोहिण्याञ्च पश्चिमदिग्गमनं उत्तरफल्गुन्यां हस्तायाञ्च उत्तरदिग्गमनं निषिद्धम् । तथाशुक्लकरणानि । नरं वणिजं विष्टिः । नरमपि केचिच्छस्तं मन्यते । अथ उत्तमलग्नानि । सिंहवृषकुम्भकन्यामिथुनानि । तत्र योगिनीनिर्णयः । प्रतिपदि नवम्याञ्च प्राच्यां योगिनी । तृतीयायां एकादश्याञ्चाग्निकोणे । पञ्चम्यां त्रयोदश्याञ्च दक्षिणे । द्वादश्यां चतुर्थ्याञ्च नैरृतकोणे । षष्ठ्यां चतुर्द्दश्याञ्च पश्चिमे । सप्तम्यां पूर्णिमायाञ्च वायुकोणे । द्वितीयायां दशम्याञ्च उत्तरदिशि । अष्टम्याममावास्यायाञ्च ऐशानकोणे । तां दक्षिणे सम्मुखे च कृत्वा न गन्तव्यम् । पापयोगव्यहस्पर्शमासदग्धादिषु यात्रा न कर्त्तव्या । वारवेलाकालवेलाकुलिकवेलाष्टिभद्रादिषु च यात्रा न कर्त्तव्या । दिरागमनदिनं नववधूशब्दे द्रष्टव्यम् ॥ * ॥ अथ नौयात्राप्रवेशविक्रयाः । तत्र तिथयः । अमावस्याष्टमीचतुर्द्दशीरिक्तभिन्नाः । तत्र नक्षत्राणि । रोहिणी पूर्व्वफल्गुनी पूर्व्वाषाढ़ा पूर्व्वभाद्रपत् उत्तरफल्गुनी उत्तराषाढ़ा उत्तरभाद्रपत् श्रवणा भरणी चित्रा एतद्व्यतिरिक्तानि । योगाः । व्यतीपातभिन्नाः । वाराः । क्रूरभिन्नाः ॥ * ॥ अथ नौकायात्रा । तत्र विहितनक्षत्राणि । अश्विनीहस्तापुष्यमृगशिरःपूर्व्वफल्गुनी-पूर्व्वाषाढ़ा-पूर्व्वभाद्रपदनुराधाधनिष्ठाश्रवणाः । वाराः शुभग्रहाणाम् । तत्र लग्नं शोभनम् । तत्र शोभनचन्द्रः । तारा च शोभना विहिता । इति ज्योतिस्तत्त्वम् ॥ * ॥

अथ यात्रायां शुभजनकद्रव्यदर्शनादि यथा,—

"धेनुर्व्वत्सप्रयुक्ता वृषगजतुरगा दक्षिणावर्त्तवह्नि-
र्दिव्यस्त्रीपूर्णकुम्भा द्विजनृपगणिकाः पुष्पमाला
पताका ।
सद्योमांसं घृतं वा दधि मधु रजतं काञ्चनं
शुक्लधान्यं
दृष्ट्वा श्रुत्वा पठित्वा फलमिह लभते मानवो
गन्तुकामः ॥"
इति समयप्रदीपः ॥

तथाशुभजनकदर्शनं यथा,—

"सम्मुखे रजकं पश्चात् क्षुरिणं यदि पश्यति ।
न गन्तव्यं तदा तस्मात् तैलवाच्चगतोऽशुभः ॥
अजो कुञ्चति गौः कासो क्षुतं वा कुरुते नरः ।
पश्यन् यात्रा न कर्त्तव्या क्लीवं पश्यति वाग्यतः ॥"
इति ज्योतिराकरः ॥

यात्राकाले विशेषदर्शनफलं यथा,—

"मृगाहिकपिमार्ज्जारश्वानः शूकरपक्षिणः ।
नकुलो मूषिकश्चैव यात्रायां दक्षिणे शुभाः ॥
विप्रकन्या शवो वद्रशङ्खभेरीवसुन्धराः ।
जम्बुकोष्ट्रखराद्याश्च यात्रायां वामके शुभाः ।
वैश्यस्त्रीपूर्णकुम्भानां यात्रायां दर्शनं शुभम् ॥"

यात्राकाले अशुभलक्षणं यथा,—

"कार्पासौषधतैलञ्च पङ्काङ्गारभुजङ्गमाः ।
मुक्तकेशो रक्तमाल्यं नग्नाद्यशुभलक्षणम् ॥" * ॥

यात्राकाले छिक्कायाः फलं यथा,—

"छिक्कायाश्च फलं वक्ष्ये लभेत् पूर्व्वे महाफलम् ।
आग्नेये शोकसन्तापौ दक्षिणे हानिमाप्नुयात् ॥
नैरृते शोकसन्तापौ मिष्टान्नञ्चैव पश्चिमे ।
अन्नं प्राप्नोति वायव्ये उत्तरे कलहो भवेत् ।
ऐशाने मरणं प्रोक्तं प्रोक्तं छिक्काफलाफलम् ॥"

अथ यात्रायां दिग्विशेषे विशेषनक्षत्राणि ।

"कृत्तिकादौ तु पूर्व्वेण सप्त ऋक्षाणि वै व्रजेत् ।
मघादौ दक्षिणे गच्छेदनुराधादि पश्चिमे ॥
प्रशस्ता चोत्तरे यात्रा धनिष्ठादिषु सप्तसु ।
अश्विनीरेवतीचित्राधनिष्ठाः सदलङ्कृताः ।
मृगाश्विचित्रापुष्याश्च मूलहस्तौ शुभौ सदा ॥"

यात्रादौ लग्नादिषु ग्रहस्थितिफलं यथा,—

"कन्याप्रदाने यात्रायां प्रतिष्ठादिषु कर्म्मसु ।
शुक्रचन्द्रौ च लग्नस्थौ शुभदौ च द्वितीयगौ ॥
शशिशुक्रजीवाश्च राशौ चाथ तृतीयके ।
भौममन्दशशाङ्कार्का बुधः श्रेष्ठचतुर्थके ॥
शुक्रजीवौ पञ्चमौ च श्रेष्ठौ बह्विवराहतौ ।
मन्दार्केन्दुकुजाः षष्ठे गुरुचन्द्रौ च सप्तमे ॥
शुक्रश्चाष्टमे श्रेष्ठो नवमस्थो गुरुः शुभः ।
चर्क्कार्किचन्द्रा दशमे एकादशेऽखिला ग्रहाः ॥
बुधोऽथ द्वादशे चैव भार्गवः सुखदो भवेत् ॥"
इति गारुडे ६० । ६१ अध्यायौ ॥ * ॥

अथ राजयात्रा ।

"इदानीं सर्व्वधर्म्मज्ञ धर्म्मशास्त्रविशारद ! ।
यात्राकालविधानं मे कथयस्व महीक्षिताम् ॥
यदा मन्येत नृपतिराक्रन्देन बलीयसा ।
पार्ष्णिग्राहोऽभिभूतोऽरिस्तदा यात्रां प्रयोजयेत् ॥
योधाश्चला प्रभूताश्च प्रभूतञ्च बलं मम ।
मूलरक्षासमर्थोऽस्मि तदा यात्रां प्रयोजयेत् ॥
अशुद्धपार्ष्णिर्नृपतिर्न तु यात्रां प्रयोजयेत् ।
पार्ष्णिग्राहाधिकं सैन्यं मूले निःक्षिप्य वा व्रजेत् ॥
चैत्रं वा मार्गशीर्षं वा यात्रां यायान्नराधिपः ।
चैत्री पश्यति नैदाघं हन्ति पुष्टिञ्च शारदीं ॥
एतदेव विपर्य्यस्तं मार्गशीर्षे नराधिपः ।
शत्रोर्व्वा व्यसने यायात् कालः स तु सुदुर्लभः ॥
दिव्यान्तरीक्षक्षितिजैरुत्पातैः पीड़ितं परम् ।
षड्भपीड़ासंतप्तं पीड़ितञ्च तथा ग्रहैः ॥
ज्वलन्तीव तथैवोल्का दिशं यस्य प्रपद्यते ।
भूकम्पोल्का दिशं यान्ति याञ्च केतुः प्रधूपयते ॥
निर्घातश्च पतेद्यत्र तं यायाद्वसुधाधिपः ।
सबलव्यसनोपेतं तथा दुर्भिक्षपीड़ितम् ॥
सम्भूतान्तरकोपञ्च क्षिप्रं यायादरिं नृपः ।
यूकामाक्षीकबहुलं बहुपङ्कं तथाविलम् ॥
नास्तिकं भिन्नमर्य्यादं तथामङ्गलवादिनम् ।
अपेतप्रकृतिञ्चैव निरायञ्च तथा जयेत् ॥
विग्रहमाख्या सेना तथा भिन्ना परस्परम् ।
व्यसनासक्तनृपतिं बलं राजाभियोजयेत् ॥